श्री अच्युताष्टकम्

Shri Achyutashtakam

Source: Wikimedia Commons — Brihat Stotra Ratnakara 1912 public-domain scan, stable file revision (item 14 on scan pages 52–53). Also compared: Internet Archive — Brihat Stotra Ratnakar, 1916 Nirnaya Sagar Press reprint (Kashmir Research Institute scan; item 14 on PDF pages 55–56); Public Domain Mark 1.0; Sanskrit Wikisource — Achyutashtakam, 1910 edition transcription, fixed comparison revision 288159.

आठ स्तुति-श्लोक

SHLOKA 1

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे॥

Acyutaṃ Keśavaṃ Rāmanārāyaṇaṃ Kṛṣṇadāmodaraṃ Vāsudevaṃ Harim |
Śrīdharaṃ Mādhavaṃ Gopikāvallabhaṃ Jānakīnāyakaṃ Rāmacandraṃ Bhaje ||

SHLOKA 2

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम्।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं सन्दधे॥

Acyutaṃ Keśavaṃ Satyabhāmādhavaṃ Mādhavaṃ Śrīdharaṃ Rādhikārādhitam |
Indirāmandiraṃ Cetasā Sundaraṃ Devakīnandanaṃ Nandajaṃ Sandadhe ||

SHLOKA 3

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये।
बल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः॥

Viṣṇave Jiṣṇave Śaṅkhine Cakriṇe Rukmiṇīrāgiṇe Jānakījānaye |
Ballavīvallabhāyārcitāyātmane Kaṃsavidhvaṃsine Vaṃśine Te Namaḥ ||

SHLOKA 4

कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक॥

Kṛṣṇa Govinda He Rāma Nārāyaṇa Śrīpate Vāsudevājita Śrīnidhe |
Acyutānanta He Mādhavādhokṣaja Dvārakānāyaka Draupadīrakṣaka ||

SHLOKA 5

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसम्पूजितो राघवः पातु माम्॥

Rākṣasakṣobhitaḥ Sītayā Śobhito Daṇḍakāraṇyabhūpuṇyatākāraṇaḥ |
Lakṣmaṇenānvito Vānaraiḥ Sevito'gastyasampūjito Rāghavaḥ Pātu Mām ||

SHLOKA 6

धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्ध्वंशिकावादकः।
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा॥

Dhenukāriṣṭako'niṣṭakṛddveṣiṇāṃ Keśihā Kaṃsahṛdvaṃśikāvādakaḥ |
Pūtanākopakaḥ Sūrajākhelano Bālagopālakaḥ Pātu Māṃ Sarvadā ||

SHLOKA 7

विद्युदुद्द्योतवान्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे॥

Vidyududdyotavānprasphuradvāsasaṃ Prāvṛḍambhodavatprollasadvigraham |
Vanyayā Mālayā Śobhitoraḥsthalaṃ Lohitāṅghridvayaṃ Vārijākṣaṃ Bhaje ||

SHLOKA 8

कुञ्चितैः कुन्तलैर्भ्राजमाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः।
हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे॥

Kuñcitaiḥ Kuntalairbhrājamānānanaṃ Ratnamauliṃ Lasatkuṇḍalaṃ Gaṇḍayoḥ |
Hārakeyūrakaṃ Kaṅkaṇaprojjvalaṃ Kiṅkiṇīmañjulaṃ Śyāmalaṃ Taṃ Bhaje ||

फलश्रुति और समापन

SHLOKA 9

अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम्।
वृत्ततः सुन्दरं कर्तृ विश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम्॥

Acyutasyāṣṭakaṃ Yaḥ Paṭhediṣṭadaṃ Prematāḥ Pratyahaṃ Pūruṣaḥ Saspṛham |
Vṛttataḥ Sundaraṃ Kartṛ Viśvambharaṃ Tasya Vaśyo Harirjāyate Satvaram ||

COLOPHON

इति श्रीशङ्कराचार्यविरचितमच्युताष्टकं सम्पूर्णम्॥

Iti Śrīśaṅkarācāryaviracitamacyutāṣṭakaṃ Sampūrṇam ||